Gyanshauryam, International Scientific Refereed Research Journal
© 2020 GISRRJ | Volume 3 | Issue 6 | ISSN : 2582-0095

# भाव ध्वनि:

नर्मदा बेहेरा
शोधच्छात्रा,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः , आन्ध्रप्रदेशः



**Article Info**
Volume 3 Issue 6
Page Number: 60-63
**Publication Issue :**
November-December-2020
**Article History**
Accepted : 01 Dec 2020
Published : 25 Dec 2020

**सारांश -** देव–मुनि-गुरु-नृप-पुत्रादिविषया रतिः, विभावादिभिः प्राधान्येन व्यञ्जितः व्यभिचारी च भावपदाभिधेयः। **"विभावादिव्यज्यमान हर्षाद्यन्यतमत्वं तत्वम्"** भावत्वमिति।

**मुख्य शब्द** – भावः, ध्वनिः, रसः, लक्षणा, साहित्य।

"रस्यते इति रसः" । इति व्युत्पत्ति योगाद् भावतदाभासदयोऽपि गृह्यन्ते। भावस्य लक्षणं साहित्यदर्पणे विश्वनाथेन एवं प्रतिपादितम् यथा –

"सञ्चारिणः प्रधानानि देवादिविषया रतिः।
उद्बुद्धमात्रः स्थायी च भाव इत्यभिधीयते॥ (साहित्यदर्पण – ३-२६०)

यत्र देवादिविषया रतिः सञ्चारिणः च प्रधानानि भवन्ति ,स्थायी – भावः उद्बुद्धमात्रः भवति तत्र भावत्वेनाभिधीयते। काव्यप्राकाशानुसारं भावस्वरूपम् –

"रतिर्देवादिविषया व्यभिचारी तथाऽञ्जितः
भाव प्रोक्तः -----"

देव–मुनि-गुरु-नृप-पुत्रादिविषया रतिः, विभावादिभिः प्राधान्येन व्यञ्जितः व्यभिचारी च भावपदाभिधेयः
यथा देवविषयारतिः –

कण्ठकोणविनिविष्टमीश ते कालकूटमपि मे महामृतम्।
अप्युपात्तममृतं भवद्वपुर्भेदवृत्ति यदि मे न रोचते॥ (परमेश्वरस्तोत्रावली)

**Copyright :** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

अत्र महादेव आलम्बनम्,ईशपदप्रतिपाद्याव्याहतैश्वर्यमुद्दीपनम् स्तवोऽनुभावः । धृतिमाहात्म्यस्मरणादयो व्यभिचारिणः। एतैरनुमितास्तावकरतिः। सामाजिकानां तैरेव विभावादिभिर्व्यञ्जिता भाव एवेति बोध्यम्।
मुनिविषया रतिः –

हरत्यघं संप्रति हेतुरेष्यतः
शुभस्य पूर्वाचरितैः कृतं शुभैः ।
शरीरभाजां भवदीयदर्शनं
व्यनक्ति कालत्रितयेऽपि योग्यताम्॥ (शिशुपालवधम्)

अत्र श्रीकृष्णस्य मुनिविषयायास्तैर्मुनिरालम्बनम्। दर्शनयोग्यताव्यञ्जनमुद्दीपनम्। श्रीकृष्णस्येयमुक्तिरेवानुभावः। तद्व्यङ्ग्यहर्षश्च व्यभिचारी। मुनिविषयकश्रीकृष्णरतिज्ञे सामाजिके भावनिष्पत्तिः।
अञ्जितव्यभिचारी यथा –

जाने कोपपराङ्मुखी प्रियतमा स्वप्नेऽद्य दृष्टा मया
मां मां संस्पृश पाणिनेति रुदती गन्तुं प्रवृत्ता पुरः।
नो यावत्परिरभ्य चाटुशतकैराश्वासयामि प्रियां
भ्रातस्तावदहं शठेण विधिना निद्रादरिद्री कृतः॥

अत्र विधिम्प्रति असूया प्राधान्येन प्रतीयते विधिश्चालम्बनम् । विधेर्दौर्जन्यमुद्दीपनम् । शठत्वोक्तिरनुभवः । प्राधान्येन व्यञ्जितोऽसूयारूपो व्यभिचारी भावपदाभिधेयः।

पण्डितराजजगन्नाथः अपि विषयेऽस्मिन्स्वमतं प्रदर्शयति । अथ किं भावत्वम् ? इति जिज्ञासायां केचन यदि कथयेयुः। विभावानुभावभिन्नत्वे सति रसव्यञ्जकत्वं भावत्वम्' इति , तदा जगन्नाथः कथयति तन्न समीचीनम्। यतो हि रसकाव्यवाक्ये अतिव्याप्तिदोषः जायते । किमर्थम् इतिचेत् रसकाव्यवाक्यं विभावानुभावतः भिन्नं सत्सव्यञ्जकं भवति । तत्र अर्थद्वारा शब्दस्यापि व्यञ्जकत्वात् । तदुक्तम्- ' शब्दबोध्यो व्यनक्त्यर्थ : शब्दोऽप्यार्थान्तराश्रयः। एकस्य व्यञ्जकत्वे तदन्यस्य सहकारिता॥' इति।

यदि पुनः वादिनः कथयन्ति अर्थद्वारा शब्दस्य रसव्यञ्जकत्वम् अस्माभिः न स्वीक्रियते किमर्थं चेत् द्वारान्तरकारणात् इति। वादिनां मते रसस्य व्यञ्जकं स्वतः स्यात् , न तु अर्थद्वारा। तदा जगन्नाथः कथयति एवं वक्तुं न शक्यम् , किमर्थम् इत्युक्ते यथा भावनाद्वारा भावस्य व्यञ्जकत्वं भवति तथैव अत्रापि अर्थद्वारा रसस्य व्यञ्जकत्वं भवत्यैव। अतः द्वारान्तरीकरणम् अवश्यं स्वीकरणीयमेव।

पुनः रसवाक्यकाव्ये अतिव्याप्तिवारणाय भावस्य लक्षणं प्रतिपादयितुं यदि विभावानुभावभिन्नत्वे सति शब्दभिन्नत्वं भावत्वम् इति कथ्यते , तदा जगन्नाथः कथयति तदा न निस्तारः । अत्र भावस्य

नूतनलक्षणप्रदानसमये शब्दस्य भिन्नत्वप्रतिपादनं जातम् । किमर्थं चेत् भावध्वनिस्थलेषु प्रधानतया भाव: ध्वनित: भवति । एतत् न रसव्यञ्जकम् । अत: अव्याप्तिदोष: जायते ।

यदि पुन: वादिनः कथयन्ति यत् भावध्वनिस्थलेषु प्रधानतया भावध्वनि: भवतु , तथा अन्तिमे रसाभिव्यक्तिः अपि भवतु इति । तत्र असम्मततया जगन्नाथः कथयति - प्रान्तेऽपि भावध्वनिस्थाने रसाभिव्यक्तिर्न भवति । किमर्थम् इति चेत् भावध्वनिस्थाने यदि रसाभिव्यक्तिं स्वीकुर्म: तर्हि साहित्यजगति भावध्वने: लोप: भविष्यति । यदि पुन: वादिनः कथयन्ति यत् भावध्वनिस्थले भावस्य चमत्काराधिक्यात् ध्वनि: भवतु । परन्तु रस: व्यज्यमानोऽपि चमत्काराभावात् न ध्वनिपदवाच्यः स्यादिति । तर्हि एतदपि न समीचीनम् । किमर्थम् इत्युक्ते चमत्काराभावरसाभिव्यक्ति: न भवत्येव । चमत्काररहितरसाभिव्यक्तौ प्रमाणाभावात् । रसे सर्वथा चमत्कार : भवतीति पूर्वं प्रतिपादितम् । यदि वा वादिनां मते प्राधान्येन ध्वन्यमानस्य भावस्य प्रान्ते रसाभिव्यञ्जकत्वं भवतु । तथापि देश - काल - वयोवस्थादिनानापदार्थघटितपदवाक्यार्थे अतिव्याप्तिदोष : भवति । तेषु वाक्येषु विभावानुभावभिन्नत्वे सति रसव्यञ्जकत्वमस्त्येव ।

यदि पुन : वादिनः कथयन्ति यत् रसाभिव्यञ्जकचर्वणाविषयचित्तवृत्तित्वं भावत्वमिति तर्हि एतदपि न युक्तियुक्तम् । अस्य अयमेव सार : यत् भावस्तावत् चित्तवृत्तिविषयः परन्तु चर्वणायोग्य: न । एतत् सूचयितुं जगन्नाथ: कथयति -

कालागुरुद्रवं हालाहलव विजानती नितराम् ।
अपि नीलोत्पलमालां बाला व्यालावलिं किलामनुते ॥ इति

विप्रलम्भेश्रृङ्गारे श्लोकोऽयमस्ति । परन्तु चर्वणाविषयचित्तवृत्तिद्वारा अत्र भाव : सम्भवेत् , परन्तु अत्र यदि एवं क्रियते तर्हि अनर्थपरम्परा भवति । अत्र कालागुरुद्रवे हालाहलज्ञानं , नीलोत्पलमालायां व्यालज्ञानं चित्तवृत्तिविषयात्मकं भवति । एवं भूतरसप्रधानस्थलेषु भावध्वनिः कथ्यते चेत् तर्हि महती क्षति : जायते । अत: भावस्य एतादृशं लक्षणं न युक्तियुक्तम् ।

पुनर्यदि वादिनः कथयन्ति - भाव: अखण्डः , तर्हि तदपि न युक्तियुक्तम् । किमर्थम् इत्युक्ते यस्य लक्षणं कर्तुं शक्यते तस्य अखण्डत्वं कथम् ? तर्हि किं नाम भावत्वम् ? इति जिज्ञासायां जगन्नाथ: कथयति 'विभावादिव्यज्यमानहर्षाद्यन्यतमत्वं तत्त्वम् । ' इति नाम अजितव्यभिचारि एव भावः इति । तदुक्तं मम्मटेन ' भाव: प्रोक्तः,व्यभिचारि तथाऽजितः' इत्यादि । सामाजिकेषु स्थितहर्षादिभावानाम् अभिव्यक्ति: स्थायिभावन्यायेन भवति । तथैव विभावानुभावसंस्पर्शेण भाव : अभिव्यक्तो भवति । भावस्य अभिव्यक्तिविषये अन्ये स्वीकुर्वन्ति यत् अभिव्यक्तिरियं रसन्यायेन भवति इति ।

भावस्य प्रकाशकाले विभावानुभावद्वयं व्यञ्जवं भवति , परन्तु रसप्रकाशवत् विभावानुभावव्यभिचारिभावानां त्रयाणां व्यञ्जकत्वं न भवति । किमर्थम् इति चेत् यदि एकस्य व्यभिचारिभावस्य

ध्वननकाले अन्यस्य व्यभिचारिभावस्यध्वननमपेक्षते , तदा पूर्वव्यभिचारिभाव : गौणो भवति । तस्मात् एकस्य व्यभिचारिभावस्य व्यञ्जकत्वे अन्यस्य व्यञ्जकत्वं न स्वीक्रियते ।

वस्तुत: प्राधान्यमनुभवति कस्मिंश्चिद्भावे प्रकरणादिवशेन तदीयसामग्रीवलेनान्तरीयकतया तन्निमानमावहतो व्यभिचार्यन्तरस्य अङ्गत्वे न कापि क्षतिः । यथा गर्वे अमर्षस्य ज्ञानम् , अमर्षे गर्वस्य ज्ञानं च भवति । तत्र एक: व्यभिचारिभाव: प्रधानः, अन्य: तस्य अङ्गमिति स्थले गुणीभूतव्यङ्ग्यशङ्काऽपि न करणीया । यत: उभयो: विभावानुभावौ समानौ । अत एव एकः व्यभिचारिभाव: प्रधानश्चेत् , अपर: तस्य अङ्गमिति स्वीकरणीयम् । अन्यथा गर्वादिध्वने : उच्छेदः एव भवेत् । इत्थं भावध्वनिविषये पण्डितराज : जगन्नाथ: सम्यक् आलोचयति ।

## सहायकग्रन्थसूची

१. ध्वन्यालोकः । आनन्दवर्धनकृतः , चौखम्बा प्रकाशनम् , व्याख्याकारः – रामसागर त्रिपाठी
२. रसगङ्गाधरः । पण्डितराजजगन्नाथकृतः , चौखम्बा प्रकाशनम् , व्याख्याकारः - पण्डित मदनमोहन झा
३. काव्यप्रकाशः । मम्मटाचार्यकृतः , चौखम्बा प्रकाशनम् , व्याख्याकारः – श्री हरिशङ्करशर्मा
४. सहित्यर्पणम् । विश्वनाथ कविराजकृतः , चौखम्बा प्रकाशनम् व्याख्याकारः – शेषराज शर्मा रेग्मी